## अम् सम्बुद्धौ । (९९/३३३)

सम्बुद्धौ परतश्चतुरनडुहोः[1] अम् आगमो भवति । [2]पूर्वस्यायमपवादः । हे प्रियचत्वः । हे प्रियानड्वन्[3] ॥

## ॠत इद्धातोः । (१००/२३९०)

ॠकारान्तस्य धातोः अङ्गस्य इकारादेशो भवति । किरति । गिरति । आस्तीर्णम् । विशीर्णम् । धातोः इति किम् ? पितॄणाम् । मातॄणाम् । लाक्षणिकस्याप्यत्र ग्रहणमिष्यते । चिकीर्षति इत्यत्रापि यथा स्यात् इति धातुग्रहणं क्रियते[4] ॥

## उपधायाश्च । (१०१/२५७१)

[5]उपधायाश्च [6]ॠकारस्य इकारादेशो भवति । [7]कीर्तयति, कीर्तयतः, कीर्तयन्ति ॥

## उदोष्ठ्यपूर्वस्य । (१०२/२४९४)

ओष्ठ्यः पूर्वो यस्माद् ॠकारात् असौ ओष्ठ्यपूर्वः, तदन्तस्य धातोरङ्गस्य उकारादेशो भवति । पूर्ताः पिण्डाः । पुपूर्षति । मुमूर्षति । [8]सुस्वूर्षति । दन्त्योष्ठ्यपूर्वोऽप्योष्ठ्यपूर्वो भवति इत्यत्रापि भवति, वुवूर्षति ऋत्विजम्, प्रावुवूर्षति कम्बलम् । ओष्ठ्यो ह्यत्र प्रत्यासत्तेरङ्गावयव एव गृह्यते, तेन 'ॠ गतौ' (धा.पा. १४९८) इत्यस्य सम्पूर्वस्य समीर्णम् इति भवति ।

[८३०] इत्त्वोत्त्वाभ्यां गुणवृद्धी भवतो विप्रतिषेधेन । (म.भा. ३.२७७)

आस्तरणम् । आस्तारकः । निपरणम् । निपारकः । निगरणम् । निगारकः ॥

## बहुलं छन्दसि । (१०३/३५७८)

[9]छन्दसि विषये ॠकारान्तस्य धातोरङ्गस्य बहुलमुकारादेशो भवति । ओष्ठ्यपूर्वस्य इत्युक्तम्, अनोष्ठ्यपूर्वस्यापि भवति । मित्रावरुणौ ततुरिः (ऋ. १.१४५.३) । 'दूरे ह्यध्वा जगुरिः' (ऋ. १०.१०८.१) । ओष्ठ्यपूर्वस्यापि न भवति । पप्रितमम् । वव्रितमम् । क्वचिद् भवति । 'पपुरिः' (ऋ. १.४६.४) ॥

[10]इति काशिकायां वृत्तौ
सप्तमाध्यायस्य प्रथमः पादः ॥

---

1. चतुरनडुहृ इत्येतयोः क. 2. पूर्वस्य आमोऽपवादः ब. क. इ. 3. हे अनड्वन् इत्यधिकम् क. 4. तपरकरणम् असंदेहार्थम् इत्यधिकम् ब.इ.ई.ह. 5. ॠत इति वर्तते इत्यधिकम् ब.इ.ई. 6. धातोः इत्यधिकम् क.ह. 7. कीर्तयति नास्ति क. 8. सुस्मूर्षति ब. 9. ॠत इति वर्तते । ॠतः धातोः उद् इति च इत्यधिकम् ड.ई. 10. वामनकाशिकायाम् ब.इ.ई, वामनविरचितायाम् ड.